National Journal of
Hindi & Sanskrit Research

**ISSN: 2454-9177**
NJHSR 2016; 1(5): 91-94
© 2016 NJHSR
www.sanskritarticle.com

**आचार्यः जि. पद्मनाभम्**
संस्कृतविभागः,
श्रीवेङ्कटेश्वरविश्वविद्यालयः,
तिरुपतिः, आन्ध्रप्रदेशः

**Correspondence:**
**आचार्यः जि. पद्मनाभम्**
संस्कृतविभागः,
श्रीवेङ्कटेश्वरविश्वविद्यालयः,
तिरुपतिः, आन्ध्रप्रदेशः

# गीतायाः उपदेशामृतम्

**आचार्यः जि. पद्मनाभम्**

**सारांशः -** अयं लेखः श्रीमद्भगवद्गीतायाः दार्शनिकं, नैतिकं तथा आध्यात्मिकं महत्त्वं प्रकाशयति। महाभारतस्य युद्धभूमौ विषण्णहृदयं अर्जुनं प्रति भगवता श्रीकृष्णेन यः उपदेशः दत्तः, सः एव गीता इति प्रसिद्धः। अस्य मुख्योपदेशेषु आत्मनः अजरामरत्वम्, पुनर्जन्मसिद्धान्तः, तथा च निष्कामकर्मयोगः प्रमुखाः सन्ति। लेखकेन प्रतिपादितं यत् गीता केवलं अर्जुनस्य कृते न, अपितु मोहग्रस्तानां सर्वेषां मानवानां कृते जीवनप्रदीपः अस्ति । अस्मिन् कर्म-ज्ञान-भक्तियोगानां सुन्दरं समन्वयम् अस्ति। गीतायाः पठनेन पठनमात्रेण न, अपितु तदनुसारं आचरणेन मनुष्यः परमगतिं प्राप्नोति। विशेषतः निष्कामकर्मयोगस्य (फलाशां विना कर्मकरणम्) उपदेशः अद्यतनसमाजे अतीव प्रासङ्गिकः अस्ति। गीतायाः माहात्म्यं वर्णयन् लेखकः कथयति यत् इयं साक्षात् पद्मनाभस्य मुखपद्मात् विनिस्सृता, अतः अन्यानां शास्त्राणां विस्तरेण प्रयोजनं नास्ति ।

**कूटशब्दाः - निष्कामकर्मयोगः** (फलाशां विना कर्तव्यपालनम्), **आत्माऽजरोऽमरः** (आत्मा न जायते न म्रियते च), **स्थितप्रज्ञः** (बुद्धौ स्थिरः पुरुषः), **लोकसंग्रहः** (समाजकल्याणार्थं कर्म), **विषादापहारी** (दुःखनाशिका वाणी), **स्वधर्मः** (स्वकीयः कर्तव्यधर्मः), **ब्रह्मविद्या** (परमात्मज्ञानम्), **नष्टमोहः** (अज्ञानस्य विनाशः), **गीतागङ्गोदकम्** (गीतायाः पवित्रं जलमिव ज्ञानम्), **योगस्थः** (योगे स्थित्वा कर्मकरणम्) ।

महाभारतस्य युद्धे अर्जुनं विषण्णहृदयं दृष्ट्वा तस्य कर्तव्यबोधनार्थं भगवता कृष्णेन यः उपदेशो दत्तः, स एव "श्रीमद्भगवद्गीता" इति नाम्ना प्रसिद्धोऽस्ति । गीतायां भगवता कृष्णेन प्रायः सर्वमपि मनुष्यस्य आवश्यकं कर्तव्यं प्रतिपादितमस्ति ।

गीतायां ये उपदेशाः सन्ति, तेषां मुख्या एते सन्ति -

(i) अयमात्माऽजरोऽमरश्चास्ति । नायं जायते न म्रियते । केनापि प्रकारेण नायं नाशं प्राप्नोति । यथा जीर्णवस्त्रमपनीय नवं वस्त्रं धार्यते, तथैव नवशरीर धारणमस्ति ।

**"वासांसि जीर्णानि यथा विहाय**
**नवानि गृह्णानि नवोऽपराणि ।**
**तथा शरीराणि विहाय जीर्णा-**
**न्यन्यानि संयाति नवानि देही ॥"[1]**

**"नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः ।**
**न चैनं क्लेदयन्त्यापो न शोषयति मारुतः ॥"[2]**

आत्माऽयम् अजरोऽमरश्चास्ति । अतः कदाचिदपि शोको न करणीयः ।

(ii) मनुष्यः स्वकर्मानुसारं पुनर्जन्म प्राप्नोति । मर्त्यः कर्मानुसारं म्रियते च ।

**"जातस्य हि ध्रुवो मृत्युः ध्रुवं जन्म मृतस्य च।**

**तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि ॥"[3]**

(iii) मनुष्यैः सदा निष्कामभावनया कर्म करणीयम् । कर्म कदापि न त्याज्यम् ।

**"कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।**

**मा कर्मफलहेतुर्भू मा ते सङ्गोऽस्त्वकर्मणि ॥"[4]**

**"नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः।**

**शरीरयात्राऽपि च तेन प्रसिध्येदकर्मणः ॥"[5]**

सर्वैः मनुष्यैः सदा स्व कर्म पालनीयम् । स्वधर्मो न कदाचिदपि त्याज्यः ।

**"स्व धर्मे निधनं श्रेयः परधर्मो भयावहः ॥"[6]**

मनुष्यैः सप्त स्वकीर्तिरक्षाकरणीया । मरणं वरमस्ति, परन्तु न कीर्तिनाशः ।

**"संभावितस्य चाकीर्तिर्मरणादतिरिच्यते ॥"[7]**

**शुभाशुभकर्मणः कदापि नाशो न भवति।**

शुभं कर्म सदा भयात् त्रायते ।

**"नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते।**

**स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात् ॥"[8]**

गीतायां ये एते उपदेशा दत्ताः सन्ति। ते सर्व एव जीवनस्योन्नतिकारकाः । गीतायाः उपदेशानुकूलम् आचरणं कृत्वा सर्वैरपि स्वजीवनमुन्नतं कर्तव्यं । एतदर्थं गीतायाः पठनं पाठनं चापि कार्यम् । **"गीता सुगीता कर्तव्या"** इति ।[9]

अधिपूर्वक 'इष्' 'पठ्' घातुभ्यां निष्पन्नयोः अध्ययन, पठन शब्दयोः पठनं अथवा अवगमनम् इत्यर्थः । किन्तु 'गै' धातुरूपः गीताशब्दस्तु उपयुक्त शब्दयोः विभिन्न एकं विशेषार्थकं पुनः पुनः गीयमानानुकूल प्रक्रियां बोधयति । एकं संक्षिप्त तात्त्विकभावं सुलभतया अवगन्तुम् अनुकूलं भवति गीतायाम् । **"गीतं गानमिमे समे"** इति अमरकोशे प्रतिपादितम् । महाभारत पुराणादिषु गीताशब्दः स्त्रीलिङ्ग वाचिनि सूचितः । भागवत पुराणे तु "गीयते इति गीतम्" इति नपुंसकलिङ्गरूपे प्रयोक्तम् ।

अर्जुनस्य दशसु नामेषु 'नर' इति अन्यत् । मानवास्सर्वे नरा एव । अत एव नरमुद्दिश्य बाधितागीता नराणां सर्वेषामपि उद्दिष्टमित्यत्र नास्ति संशयः । अर्जुने शोकमोहौ उभावपि दुर्लक्षणौ सञ्जातौ । एते सर्वे अस्मदीयाः इत्ययं मोहः । एते मया म्रियन्ते इत्ययं शोकः । एतौ केवलम् अर्जुनस्यैव न परिमितौ । संसारसागरे पान्थाः सर्वेऽपि शोकमोहसहिताः एव । अहङ्कार-ममकारसंयुतः शोकमोहादिभिः अवश्यं भवति ।

तस्य शाश्वतसुखशान्तिः न जायते । एनां दुःस्थितिम् अधिगन्तुं तस्य आत्मानात्माविवेकज्ञानम् आवश्यकं भवति । गीतायां द्वितीयाध्याये श्रीकृष्णः आत्मानात्मविवेकज्ञानं प्रधानतया बोधयति। विवेकसम्पन्नस्य स्थितप्रज्ञस्य लक्षणानि अस्मिन् अध्यायान्ते वर्णितानि । "एषा ब्राह्मी स्थितिः पार्थ" इति स्थितप्रज्ञस्य ब्राह्मी स्थितिः अत्र अभिवर्णित । तथैव तत् स्थितिसाधननिष्कामकर्मयोगः तृतीयाध्याये विविधैः रीतिभिः उक्तः । सर्वां गीतां श्रुत्वा अर्जुनः **"नष्टमोहस्मृतिर्लब्धा"[10]** इत्यवदत् । अनेन ज्ञायते यत् गीता मोहनाशिका, आत्मज्ञानप्राप्तिकारिका इति ।

कर्तव्यपालनाय एतदेव मुख्यं प्रयोजनम् । कर्तव्यनिर्वहणमेव गीतायाः सार्थकता ।

'गीयते' इति गीता । गानम् आनन्दसमये एव सम्भवति किन्तु न दुःखसमये अत एव गीता आनन्ददायकः इति मुमुक्षुभिः उच्यते । गीतायाः अष्टादशाध्यायेषु निरतिशयानन्दकारकाः विविधोपायाः सुललिततया बोधिताः। अत एव गीताप्रबोधः "अशोच्यान्"[11] इति शब्देन प्रारब्धः, "माशुचः"[12] इति शब्देन समाप्तः । शोकराहित्यम्, आनन्दप्राप्तिः इत्येतौ गीतापठनात् सञ्जाते महाफले ।

पाण्डवाः कौरवाश्च अन्योन्यमैत्रीम् अनपहाय अत्यन्तप्रीत्या कालम् अगमन्नासन् । कतिचन दिवसापगमे दुर्योधनस्य हृदये असूयानामककीटकं प्रविश्य क्रमं क्रमं तस्य विवेकम् अपाहरत् । तेन कारणेन सः शकुन्यादिभिः मित्रैः वक्रमार्गेण पाण्डवान् द्यूतक्रिडया जित्वा राज्यमपाहरत् । पाण्डवाः द्वादशवर्षपर्यन्तं वनवासं, वर्षपर्यन्तम् अज्ञातवासञ्च अकुर्वन् । तथापि तेषां राज्यं तेभ्यः दातुं दुर्योधनः नाङ्गीचकार । अर्धराज्यं वा पादराज्यमपि वा अन्ते ग्राममपि वा सूचीस्थलपर्यन्तं वा अपि पाण्डवेभ्यः दातुं दुर्योधनस्य मनः नानुमेने । तदनन्तरं कृष्णमध्यवर्तित्वम् अभवत्। तेनाऽपि प्रयोजनं न सञ्जातम् । अन्ततः पाण्डवानां कृते धर्मयुद्धम् अवश्यं करणीयमभवत् । तस्मिन् समये अर्जुनस्य अभीष्टप्रकारेण श्रीकृष्णः सारथिर्भूत्वा उभयोः सेनयोर्मध्ये रथं प्रास्थापयत् । स्वकीयाग्रजान् अनुजान्, पितृपितामहान्, गुरून् आदीन् सर्वान् अपि दृष्ट्वा अर्जुनः "एतान् स्वजनान् अहं कथं संहरामि ? अयं पापहेतुः । बन्धून् संहार्य राज्यप्रापणादपि भिक्षाटनेन जीवनं समीचीनं भवेत्" इति अनेकधा विचिन्त्य शोकतप्तः भूत्वा गाण्डीवं विसृज्य रथात् पपात । धर्माधर्मविवेचनशून्यः अर्जुनः श्रीकृष्णस्य पादयोः पतित्वा **"शिष्यस्तेऽहं शाधिमां त्वां प्रपन्नम्"** इति प्रार्थयामास । श्रीकृष्णः अर्जुनाय भगवद्गीताम् उपदिदेश । तेन कारणेन अर्जुनस्य अज्ञानं विनश्य ज्ञानोदयोऽभवत् । एतादृशस्य अर्जुनस्य अज्ञानापहारिणी गीता सर्वेषामपि अज्ञानापहारिणि भवति ।

**गीतायाः आवश्यकता**

धर्मसन्देहनिवृत्यर्थं यदि सद्गुरुर्न लभ्यते तदा शास्त्राण्येव प्रमाणानि । गीताऽपि शास्त्रेषु अन्यतमा । गीतायाः समाश्रयणेन जीविते सन्देहाः सर्वेऽपि निवृत्ताः भवन्ति ।

अद्याऽपि देशकालजातिमतस्त्रीपुरुषविवक्षतां विना उत्तमसाधकाः, धर्मजिज्ञासवः, सत्यान्वेषकाः, भगवद्गीतामृतम् आस्वाद्य पवित्रहृदयाः भूत्वा जीवितलक्ष्यं साधयन्ति।

मानवजीवयात्रायां ये सन्देहाः जायन्ते ताः नैतिकाध्यात्मिकसमस्याः सर्वाः अपि परिहार्य गीता सन्मार्गं दास्यति । गीतापठनेन जनाः

जननमरणप्रवाहरूपसंसारं विमुच्य अमरस्थितिं प्राप्नुवन्ति । अर्जुनं निमित्तीकृत्य श्रीकृष्णः भगवान् गीतोपदेशं लोकोद्धरणार्थं चकार । गीता परमरहस्यानाम् उत्तमज्ञानम् । तत्प्रयोजनं गीतायां श्रीकृष्णः उपदिदेश । गीतायां न केवलं भक्तिज्ञानकर्मयोगाः किन्तु तत्र तत्र पतञ्जलियोगमपि अन्तर्भवति । पतञ्जलियोगः चित्तवृत्तिनिरोधद्वारा शीघ्रतया चित्तैकाग्र्यं प्राप्तुं अमूल्यसाधकः। शारीरकमानसिकसंसिद्धाः भगवद्गीतामभ्यस्य कार्यसिद्धिं लभेरन् । मार्गं च किमपि वा भवतु गम्यस्थानमेकमेव । सत्यमेव सौन्दर्यम् । सा एव परिपूर्णस्थितिः तदेव सद्गुणं ज्ञानम् । ज्ञानं नाम नित्यानित्यवस्तुविवेकम् । अनित्यम् विसर्जयेत् । तदेव वैराग्यम् । एतान् गुणान् गीताशास्त्राध्ययनेन, साधनेन लभेरन् । एतत् ज्ञानं सम्प्राप्य लोकव्यवहारेषु निष्कामबुध्या व्यवहरेत् ।

गीताध्ययनपरायणस्य नलिनीपत्रे जलबिन्दुरिव पापानि न स्पृशन्ति। यत्र गीताग्रन्थो भवति, यत्र गीतापारायणं क्रियते तत्र प्रयागादिसमस्ततीर्थानि भवन्ति । यत्र गीतापारायणं क्रियते तत्र समस्त देवताः, ऋषयः, योगिनः शीघ्रमागत्य साहाय्यं कुर्वन्ति। यत्र गीतापठनं, चर्चा, बोधनं, श्रवणं क्रियन्ते तत्र भगवान् भवति । ये निश्चलचित्तेन अष्टादशाध्यायान् नित्यं पठन्ति तेषां ज्ञानसिद्धिः जायते । ते मुक्तिं लभन्ते । गीतायाः अर्धभागपठनेनापि गोदानफलं लभते । गीतायाः ऊनपादभागपठनेनापि गङ्गास्नानफलं लभते । अध्यायत्रयपठनेन सोमयागफलं प्रलभते । यः गीतायाः एकमपि वा अध्यायं पठति सः रुद्रलोकमवाप्नोति। यः गीतायाम् एकस्मिन्नध्याये पादमपि वा नित्यपारायणं करोति सः मन्वन्वरे उत्कृष्टमानवजन्म प्राप्नोति । गीतायां दशश्लोकाः वा, सप्त वा पञ्च श्लोकाः वा चत्वारः, त्रयः, द्वौ वा, एकमपि वा अन्ते अर्धश्लोकं वा यः पठति सः चन्द्रलोकं प्राप्य तत्र दशसहस्रवर्षाणि सुखेन कालं यापयति। तथा गीतापठनसमये जीवं जहति सः उत्तममानवजन्ममवाप्नोति ।

मानवजन्म सम्प्राप्य गीताध्ययनं पुनः पुनः उत्तममोक्षम् अवाप्नुयात् । महापापी अपि यदि गीताश्रवणासक्तः तदा वैकुण्ठं प्राप्य विष्णुना सह आनन्दमवाप्नुयात् । अस्मिन् जगति गीतामाश्रित्य जनकादयः राजानः अनेके अपि पापरहिताः भूत्वा परमात्मपदमवाप्नुवन् ।

महाभारते भगवद्गीतायाः प्राशस्त्यम् एवं विद्यते। परमपावनं गीताशास्त्रं यः प्रयत्नपूर्वकं पठति सः भयशोकादिरहितः विष्णोः पदमवाप्नुयात् । गीताध्ययनपारायणस्य पूर्वजन्मकृतं पापं प्रणश्यति । यथा स्नानेन मानवानां शरीरमालिन्यम् उन्मुच्यते तथा गीताज्ञानजले एकैकवारं निमज्जनेन संसारमालिन्यं सर्वमपि विनश्यति। महाभारतामृतसर्वस्वं, विष्णुमुखात् प्लावितगीतागङ्गोदकं च यः पिबति तस्य पुनर्जन्म न विद्यते । गीता नाम सर्वशास्त्रस्वरूपिणी । महाभारतामृतसर्वस्वमेव भगवद्गीता । महाभारतं मथनं कृत्वा गीतामृतं बहिरानीय श्रीकृष्णमूर्तिः तदेव अर्जुनमुखे प्राविवेश ।

श्रीमद्भगवद्गीतायाः माहात्म्यम्

श्रीमद्भगवद्गीता साक्षाद्भगवतः दिव्यवाणी । अस्याः महिमा अपारः, अपरिमितश्च । भगवद्गीतायाः माहात्म्यं वचसि वर्णितुमनितरसाध्यम् । यतः अयः कस्मिंश्चित् परमरहस्यग्रन्थः । अस्यां प्रयुक्ता संस्कृतभाषा अतीव सरला, परमरमणीया च । अल्पीयसाभ्यासेनैव निगूढार्थाः अपि अवगताः भवन्ति। अस्याः आशयस्तु अतिगभीरः। आजीवितमभ्यसनीयोऽयं ग्रन्थः। अस्यां पदे पदे रहस्यमेकं निक्षिप्तमिव निरन्तरपठनेन द्योतयति। अतः एषा निगूढार्थनिधिः। गीतायां भगवतः गुणप्रभावरहस्यानि समग्रतया वर्णितानि। एतादृशविवरणम् इतरग्रन्थेषु अगोचरम्। अत एव -

**"गीता सुगीता कर्तव्या किमन्यैः शास्त्रविस्तरैः ।**

**या स्वयं पद्मनाभस्य मुखपद्माद्विनिस्सृता ।।**[13]

इति व्यासभगवान् श्रीमन्महाभारते भगवद्गीतां वर्णयन्नवोचत् । भगवता व्यासेनैव स्वयं अस्याः माहात्म्यं वर्णितम् । भगवान् श्रीमद्भगवद्गीतायां ज्ञान-ध्यान-कर्म-भक्ति-योगसाधनानि अर्जुनाय उपदिदेश। स्त्रियः, शूद्राः, वैश्याः तथैव पापयोनिजाः अपि भगवति भक्तिश्रद्धापरायणाः भूत्वा परमां गतिं प्राप्नुवन्ति । मानवः स्वाभाविककर्मणा भगवत्पूजनेन परमां सिद्धिं प्राप्नोति । तथा च –

**"गीताशास्त्रमिदं पुण्यं यः पठेत् प्रयतः पुमान् ।**
**विष्णोः पदमवाप्नोति भयशोकादिवर्जितः ॥**
**गीताध्ययनशीलस्य प्राणायामपरस्य च ।**
**नैव सन्ति हि पापानि पूर्वजन्मकृतानि च ।।**
**मलनिर्मोचनं पुंसां जलस्नानं दिने दिने ।**
**सकृद्गीताम्भसि स्नानं संसारमलनाशनम् ।।**
**गीता सुगीता कर्तव्या किमन्यैः शास्त्रविस्तरैः ।**
**या स्वयं पद्मनाभस्य मुखपद्माद्विनिःसृता ।।**
**भारतामृतसर्वस्वं विष्णोर्वक्त्राद्विनिःसृतम् ।**
**गीतागङ्गोदकं पीत्वा पुनर्जन्म न विद्यते ॥**
**सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः ।**
**पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत् ॥**
**एतत्माहात्म्य संयुक्तं गीताभ्यासं करोति यः ।**
**स तत्फलमवाप्नोति दुर्लभांगतिमाप्नुयात् ।।**

सूत उवाच -

**माहात्म्यमेतद्गीताया मया प्रोक्तं सनातनम् ।**
**गीतान्ते च पठेद्यस्तु यदुक्तं तत्फलं लभेत् ।।**[14]

इति श्रीवराहपुराणे गीतामाहात्म्यम् उक्तम् । अन्यत्र -

**"सर्वोपनिषदो गावो, दोग्धा गोपालनन्दनः ।**

**पार्थो वत्सः सुधीर्भोक्ता, दुग्धं गीतामृतं महत् ।।**[15]

कस्य न विदितं विपश्चितो भगवद्गीताया गुणगौरवम्। गीतेयं न केवलं प्रस्तौति सर्वासामप्युपनिषदां सारभागम्, अपि तु श्रुतिसारमपि प्रस्तौतितराम्। सांख्ययोगदर्शनयोः सिद्धान्तानां वैशद्येन विवेचनात् प्रतिपादनाच्च दर्शनसारसंग्रहोऽप्यत्रोपलभ्यते। वेदान्तदर्शनप्रति-पादितस्य **"तत्त्वमसी"ति** महावाक्यस्याप्यत्रोपलम्भाद्वेदान्ता-वगाहित्वमप्यस्य लक्ष्यते । सेयं सरलया भावाभिव्यक्ति- प्रक्रियया, भूयिष्ठयाऽर्थगभीरतया, प्रेष्ठया पद्धत्या, श्रेष्ठया विवृतिसरण्या,

साधिष्ठया योगसाधनादीक्षया, वरिष्ठयाऽऽत्मविशुद्धिशिक्षया सर्वस्यापि लेकस्यादृतिमनुभवति । एतदेवात्र समासत उपस्थाप्यते विव्रियते च।

गीतायां ये भावाः सिद्धान्ताश्च प्रतिपाद्यन्ते, ते क्वचित्समासतः क्वचिच्च विस्तरश उपनिषत्सु वेदेषु च समुपलभ्यन्ते । गीतायां विषयक्रमेण, हृद्येन भावाभिव्यञ्जनप्रकारेण, साधिष्ठया विवृत्या च ते भावाः समासाद्यन्त इति प्रमुखं गीतायाः महत्त्वम् । गीतेयं प्रसादगुणसंयोगात्, अल्पीयोभिः शब्दैः भूयिष्ठस्य अर्थावबोधस्य संकलनात्तथा प्रीणयति चेतः सचेतसां यथा न ग्रन्थान्तरम् । निष्कामकर्मयोगस्य वर्णनं महत्त्या विवृत्या समुपलभ्यते गीतायाम् । तद्यथा -

**"कर्मण्येवाधिकारस्ते, मा फलेषु कदाचन ।**

**मा कर्मफलहेतुर्भूते सङ्गोऽस्त्वकर्मणि" ।।[16]**

विहायासक्तिं फलप्रेप्सामनास्थाय कर्मणि प्रवर्तितव्यम्। निष्कामकर्मकरणेन चेतः प्रसीदति, धीर्विकसति, मानसमानन्दमनुभवति, न कर्माणि बध्नन्ति मानवम्, न विषया विमोहयन्ति मानसम्, न पतति जीवः स्वलक्ष्यात्, न च मोहो मनो मोहयति । निष्कामकर्मयोगप्रतिपादकाः केचन श्लोका अत्र दिङ्गात्रं निर्दिश्यन्ते । “योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय”,[17] “कर्मयोगेन योगिनाम्”,[18] “न कर्मणामनारम्भात् नैष्कमर्यं पुरुषोऽश्नुते”,[19] “कार्यते ह्यवशः कर्म सर्वैः प्रकृतिजैर्गुणैः”,[20] “यस्त्विन्द्रियाणि मनसा नियम्यारभतेऽर्जुन। कर्मेन्द्रियैः कर्मयोगमसक्तः स विशिष्यते ॥”[21], “नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः।”[22] “तस्मादसक्तः सततं कार्यं कर्म समाचर ।”[23] “कर्मणैव हि संसिद्धिम् आस्थिताजनकादयः ।”[24] “सक्ताः कर्मण्यविद्वांसो यथा कुर्वन्ति भारत । कुर्याद् विद्वांस्तथाऽसक्त- श्चिकीर्षुर्लोकसंग्रहम् ॥”[25] “कुरु कर्मैव तस्मात् त्वं”[26], “कर्मणो ह्यपि बोद्धव्यं”[27] “कर्मण्यकर्म यः पश्येदकर्मणि च कर्म यः ।”[28]

**उपसंहारः (Conclusion) -** श्रीमद्भगवद्गीता मानवजीवनस्य सर्वासां समस्यानां समाधानभूता अस्ति । यदा मनुष्यः कर्तव्यमूढः भवति, तदा गीता तस्मै सन्मार्गं दर्शयति । लेखस्य परिशीलनेन स्पष्टं भवति यत् गीतायाः मुख्योद्देश्यं 'अज्ञाननाशः' तथा 'कर्तव्यबोधः' अस्ति । अत्र भगवता प्रोक्तं यत् "कर्मणि एव अधिकारः अस्ति, फलेषु कदापि मा अस्तु"। इयं भावना मनुष्यं मानसिकतनावतः मुक्तां करोति । गीतायाः १८ अध्यायेषु केवलं अध्यात्मं न, अपितु मनोविज्ञानम् अपि निगूढम् अस्ति । अतः स्वजीवनस्य उन्नत्यै, आत्मशान्तये च प्रत्येकेन मानवेन गीतायाः अध्ययनं, चिन्तनं, अनुसरणं च करणीयम् ।

**सहायकग्रन्थसूची**


१) **श्रीमद्भगवद्गीता (शाङ्करभाष्यसहिता),** आदिगुरु-शङ्कराचार्यः, गीताप्रेस, गोरखपुर, २०२० ।

२) **गीता-रहस्य,** लोकमान्य बाल गङ्गाधर तिलक, तिलक मन्दिर, पुणे, २०१५ ।

३) **अनासक्ति-योग,** महात्मा गान्धी, नवजीवन प्रकाशन, अहमदाबाद, २०१२ ।

४) **भगवद्गीता (यथारूप),** ए. सी. भक्तिवेदान्त स्वामी, इस्कोन (ISKCON), २०२१ ।

५) **साधक-सञ्जीवनी,** स्वामी रामसुखदास, गीताप्रेस, गोरखपुर, २०१८ ।

६) **Essays on the Gita,** श्री अरविन्द घोष, श्री अरविन्द आश्रम, पुदुचेरी, १९९७ ।

७) **श्रीमद्भगवद्गीता (तेलुगु व्याख्या),** मलदी वेङ्कट सुब्रह्मण्यम्, रामकृष्ण मठ, हैदराबाद, २०१० ।

८) **गीता-प्रवचन,** विनोबा भावे, सर्व सेवा सङ्घ प्रकाशन, २००८ ।

९) **गीतामकरन्दम्,** श्रीविद्याप्रकाशानन्दस्वामी, शुकब्रह्माश्रम, श्रीकालहस्ती, १९८१ ।

१०)**श्रीवराहपुराणम्, चौखम्बासंस्कृतसिरीज्, वाराणसी, १९७१ ।**


1 श्रीमद्भगवद्गीता - 2-22
2 श्रीमद्भगवद्गीता - 2-23
3 श्रीमद्भगवद्गीता -2-27
4 श्रीमद्भगवद्गीता - 2-47
5 श्रीमद्भगवद्गीता - 3-8
6 श्रीमद्भगवद्गीता - 3-35
7 श्रीमद्भगवद्गीता - 2-34
8 श्रीमद्भगवद्गीता - 2-40
9 श्रीमद्भगवद्गीता - 2-72
10 श्रीमद्भगवद्गीता 18-73
11 श्रीमद्भगवद्गीता - 2-11
12 श्रीमद्भगवद्गीता 18-66
13 श्रीमद्भगवद्गीता - 2-7
14 श्री वराहपुराणम् अ.30/1-23
15 गीतास्तुतिः ।
16 श्रीमद्भगवद्गीता - 2-47
17 श्रीमद्भगवद्गीता - 2-48
18 श्रीमद्भगवद्गीता 3-3
19 श्रीमद्भगवद्गीता - 3-4
20 श्रीमद्भगवद्गीता 3-5
21 श्रीमद्भगवद्गीता 3-7
22 श्रीमद्भगवद्गीता - 3-8
23 श्रीमद्भगवद्गीता 3-11
24 श्रीमद्भगवद्गीता - 3-20
25 श्रीमद्भगवद्गीता 3-25
26 श्रीमद्भगवद्गीता - 4-15
27 श्रीमद्भगवद्गीता - 4-17
28 श्रीमद्भगवद्गीता - 4-18